National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 237 -239
© 2026 NJHSR
www.sanskritarticle.com

**जोगेश्वर गडत्या**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**जोगेश्वर गडत्या**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# आचार्य जि.एस्.आर्.कृष्णमूर्तिमहोदयानां संस्कृतसाहित्यक्षेत्रे अवदानम्

**जोगेश्वर गडत्या**

**उपोद्घातः-**

संस्कृतसाहित्यप्रपञ्चस्याविर्भावो महामहिमवतो गङ्गादिमहाप्रवाह इव निखिलज्ञानराशेः वेदादेवासीदिति सर्वसम्मतः। अथ इदं संस्कृतसाहित्यं द्विविधं भवति-वैदिकं लौकिकञ्चेति। तत्र वैदिके तावद् वेदाः, उपवेदाः, वेदाङ्गानि, ब्राह्मणानि, आरण्यकानि, उपनिषदश्च संगृह्यन्ते। लौकिके पुनः रामायणमहाभारतादिमहाकाव्य-खण्डकाव्य-नाटक-चम्पूप्रभृतीनि परिगण्यते।संस्कृतसाहित्ये वाल्मीकि-भास-कालिदास-दण्डि-भारवि-माघ-मम्मट-विश्वनाथादयः प्राचीनाः कवयः प्रसिद्धाः आसन्। आधुनिकसंस्कृतकविषु डॉ.रेवाप्रसादद्विवेदीः, डॉ.सत्यव्रतशास्त्री, डॉ.अभिराजराजेन्द्रमिश्रः,डॉ.सूर्यमणि-रथः, डॉ.राधावल्लभत्रिपाठी, डॉ.प्रमोदचन्द्रमिश्रः, प्रो.जि.एस.आर्.कृष्णमूर्ति प्रभृतयः स्वनामधन्या भवन्ति। आधुनिकसंस्कृतकवीषु आचार्य जि.एस.आर्.कृष्णमूर्तिः आन्ध्रीयसंस्कृतकविः अन्यतमः। अस्य कवेः संस्कृतसाहित्यं प्रति महत्वपूर्णा भूमिका वर्तते।

**कवेः जन्मसमयः-**

असाधारणः प्रतिभावान्,विलक्षणो विद्वान्,श्रद्धास्पदः,सदाचरणेन विद्वत्समाजे लब्धप्रतिष्ठः सम्पूर्णेऽस्मिन् भारतवर्षे च प्रगाढपाण्डित्येन प्रख्यातः आचार्य जि.एस्.आर्.कृष्णमूर्तिमहोदयः चान्द्रमानगणिते विलम्बिनामके वर्षे कार्तिकमासे शुक्लपक्षे अष्टम्यां तिथौ जन्म अलभत। तद्भवति गोकुलाष्टमी इति। गोकुलाष्टम्यां जन्म अलभत इति हेतोः आचार्यस्य नाम 'कृष्ण' इति विद्यते। आंग्लभाषायां १७ नवम्बर १९५९ इति वर्तते।

**कवेः शिक्षा-**

कविना प्राथमिकी शिक्षा मातामहगृहे अक्षराभ्यासादिकं विधाय तत्रैव प्राथमिकी पाठशालायां प्राथमिकीं विद्यां परिसमाप्तवान्। बाल्ये अष्टाध्यायीकण्ठपाठः,शब्दरूपाणि,अमरकोशः,प्रसिद्धाः नीतिश्लोकाः कण्ठस्थीकृताः। आन्ध्रविश्वविद्यालयात् व्याकरणविषये एम्.ए. इति स्नातकोपाधिम् उन्नतश्रेण्यामुत्तीर्य राष्ट्रियसंस्कृतसंस्थानात् शिक्षाशास्त्रीति उपाधिमपि लब्धवान्। सद्यः शोधकार्येण आकृष्टः तिरुपतिकेन्द्रीयसंस्कृतविद्यापीठे कुलपतिचराणाम् आचार्याणाम् आर्.महादेवन्महोदयानां मार्गनिर्देशने पाठसम्पादनात्मकं विषयमाश्रित्य "चिदम्बरकविकृतस्य शब्दार्थचिन्तामणिनामकस्य पाठसमीक्षात्मकं सम्पादनम्"कारि ।

**कवेः अध्यापनम्-**

१९८३ तमे वर्षे शोधोपाधिसमनन्तरम् अध्यापने रतः केन्द्रीयसंस्कृतविद्यापीठे अंशकालीनमध्यापनं कृत्वा तदनन्तरवर्षे एव कतिपयदिनानि, गुण्टूर नगरे केन्द्रीयविद्यालयस्य पूर्णकालिकाध्यापकत्वं निरूह्य तदनु काञ्चीपुरे श्रीचन्द्रशेखरेन्द्र-सरस्वतीन्यायशास्त्रमहाविद्यालये व्याख्यातृपदे वर्षत्रयं यावत् कार्यमकरोत् । तदनु राष्ट्रियसंस्कृतसंस्थानस्य सेवायां प्रविष्टः केन्द्रीयसंस्कृतविद्यापीठे लखनऊनगरे त्रयोदशवर्षाणि यावत् व्याख्यातृपदम् उच्चव्याख्यातृपदं प्रवाचकपदं च अलंकृतम् ।कालान्तरे तिरुपतिस्थ राष्ट्रियसंस्कृतविश्वविद्यालये आचार्य रुपेण कार्यकुर्वन्तः सम्प्रति कुलपति रूपेण कार्यं कुर्वन्तः सन्ति।

**आचार्य जि. एस्. आर्. कृष्णमूर्तिमहोदयस्य प्रमुखकृतीनां संक्षिप्त-परिचयः-**

**❖ वानकी-**

अस्मिन् खण्डकाव्ये नैकेषां शास्त्राणां समावेशो दृश्यते। वानकीखण्डकाव्यस्य वनसम्बन्धितत्त्वानां पर्यालोचनेन सह सम्पूर्णस्य संस्कृतवाङ्मयस्य चर्चा कुर्वता कविना खण्डकाव्येऽस्मिन् नवीन-भावोन्मेषः सञ्चारितः। अस्मिन् खण्डकाव्ये नवखण्डाः सन्ति। प्रथमखण्डत्रये वानक्याः आगमनं, तत्परं अन्येषु खण्डेषु शास्त्राणां विवेचनं च वर्णितम्।

**❖ नवरूपकम्-**

नवरूपकमिदं प्रकाशत्रयात्मकं भवति।प्रतिप्रकाशं त्रीणि रूपकाणि संगृहीतानि सन्ति। नवरूपकाणि यस्मिन् तत् नवरूपकमिति व्युत्पत्त्या रूपकाणां संख्या नव इति ज्ञायते।

**प्रथमप्रकाशे-** १-वरविक्रयम् । २-प्रेमरेखा । ३-वञ्चकपञ्चकम् ।

**द्वितीयप्रकाशे-** १-बधिरचतुष्टयम् । २-कन्याशुल्कम्। ३-वैद्यवाचस्पत्यम्।

**तृतीयप्रकाशे-** १-सोऽयं देवदत्तः। २-ते हि नो दिवसा गताः ३-प्रवरधनञ्जयम्।

**❖ ब्रह्मोत्सवतारावली-**

प्रभुवेंकटेशस्य ब्रह्मोत्सवमहिमा विषये अस्मिन् खण्डकाव्ये वर्णितमस्ति। प्रभुवेंकटेशस्य बहवः उत्सवाः भवन्ति।तेषु ब्रह्मोत्सवः श्रेष्ठः प्रसिद्धः पर्वः वर्तते। प्रायतः नवदिनात्मकः एषः उत्सवः भवति।काव्येऽस्मिन् ब्रह्मोत्सवस्य सामाजिक-धार्मिक-वैज्ञानिक-महत्त्वानि वर्ण्यन्ते।

**❖ कालं न निद्रापयाणि-**

कालं न निद्रापयाणि इतीदं "कालान्नि निद्र पोविव्वनु" इति तेलुगु कवितासङ्कलनस्य संस्कृतानुवादः। अत्र प्राचीनार्वाचीनमान्यातानां ग्राम्यनागरीकजीवनपरिस्थितीनां च मध्ये अन्तरं सम्यक् उपवर्णितम्। एकैकाऽपि कविता सहृदयहृदयावर्जिका भवति।

**❖ किमपि दुष्करं न हि**

'कोई मुश्किल नहीं' इत्यस्य कवितासङ्कलस्य संस्कृतानुवादः भवति "किमपि दुष्करं न हि" इति।अस्य मूललेखकः पूर्वकेन्द्रमन्त्री डॉ. रमेश पोखरियालः निशङ्कः।अस्मिन् ग्रन्थे पञ्चसप्ततिः कविताः सङ्कलितो वर्तन्ते। कवितासंग्रहेऽस्मिन् समाजे विद्यमानानां परिस्थितिनां वर्णनं विद्यते। क्षणे क्षणे लोकैः यत् लब्धं घातजातमपि तत् अलङ्करोति, येषां सम्प्रति मनः प्रसन्नम् अन्यायैः, तेषामेव अन्यायानां विरोधे सङ्घर्षः प्रतिफलति। ये स्वयम् अन्तर्बहिश्च द्वन्द्वात् उपरि उत्थाय नवकामनाभिः सह नूतनमार्ग सृष्ट्वा हर्षाणाम् आसारां कामयन्ते, तान् देशवासिनः जागरूकान् भारतभाग्य-विधातृन् च स्रष्टुम् आह्वयति एताः रचनाः।

अनेन प्रकारेण कृष्णमूर्तिमहोदयः लघुध्वन्यालोकः,काव्येषु प्रायोगिक व्याकरणम्,पुलन्दिनी सुप्रभातम्, काव्यकल्पतरुः, तौ यक्षौ पुनर्नायातौ, वृक्षो रक्षति रक्षितादिसुप्रसिद्धग्रन्थकवितादयः लिखितवान्।

**कवेः प्रतिभा-**

कृष्णमूर्तिमहोदयस्य पञ्चाशत् अनुसन्धानलेखाः हिन्दी-आङ्ग्ल-तेलुगुप्रभृतिषु विभिन्नभाषासु प्रकाशिताः सन्ति । संस्कृतकाव्यवाङ्मये अस्य कवेः रचनाः विविधपत्रिकासु प्रकाशिताः। केन्द्रसाहित्या-काडमीसभासु जातीयकविसङ्गोष्ठीषु मूर्तिमहोदयस्य कवित्वम-भिवन्दितं विद्वद्भिः। तेलुगुसाहित्यसभासु इन्द्रसभा नामके नाट्याभिनये तथा अष्टावधानकार्यक्रमेषु सोत्साहं भागं गृहीत्वा स्वकविप्रतिभया सुपरिचितः ।

अय न केवलम् अध्यापकः, अनुसन्धाता, कविः, विमर्शकः अपि च ग्रन्थसम्पादकः भवति । किञ्च बहूनां संस्कृतग्रन्थानां पत्रिकाणां च सम्पादकत्वेन संस्कृतसेवातत्परः भवति। अयं १९९८ तमे वर्षे गोमतीपत्रिकासम्पादकः आसीत्। समयानुसारं राष्ट्रियसंस्कृतविद्या-पीठस्याधोलिखितग्रन्थानां च सम्पादनकार्यं कृतवान्।यथा-

१) बुधरञ्जनी । २) साहित्यसुषमा । ३) शास्त्रार्थसुधा ।
४)विद्वद्दमनी।५) जयदेवगीतगोविन्दम् (सर्वाङ्गसुन्दरीव्याख्योपेतम्)।
६)रसधुनीः ।

**आचार्यस्य काव्ये सामाजिकवैशिष्ट्यम्-**

आचार्य जि.एस्.आर्.कृष्णमूर्तिमहोदयस्य ग्रन्थे सामाजिक-चित्रणम्,परिवेशरक्षणोपायाः, धार्मिकप्रवृत्तिः, विश्वशान्तिवार्तादीनां अनेकेषां विषयाणां समावेशो दृश्यते।

**❖ सामाजिकचित्रणं यथा-**

वानकीकाव्ये सामाजिकचित्रस्य विचाराऽवसरे भारतीयसंस्कृतिः, परिवारः, शिक्षा, भाषादीनां च वैशिष्ट्यम् आचार्यैः प्रतिपादितम्।

**❖ परिवेशरक्षणोपायाः यथा-**

परिवेशरक्षणार्थं वनस्य रक्षा अपेक्षते।अस्मिन् विषये आचार्यैः स्वग्रन्थे वर्णितं यत्-

**आद्याहं सुरभारतीवरगिरा न्याय्यं सदा चार्थये**
**मन्ये संस्कृतपण्डितेषु नितरां न्याय्यं सदा रक्षितुम्।**
**पूता भारतसंस्कृतिस्सुविशदा मत्प्राङ्गणे वर्धिता**
**नूनं मे मम दापयन्ति विबुधाः पूतं पदं प्राक्तनम्।।**

वानकी . विनति..११

**❖ धार्मिकप्रवृत्तिः यथा-**

न हि धर्मो विद्वेषं शिक्षयति। आचारमूलकस्य सत्याहिंसादिरूपस्य धर्मस्य सर्वधर्मेषु समत्वम् अनिवार्यत्वं च व्यपदिश्यते,तत्पालने न कस्यचिदपि विपश्चतो विप्रतिपत्तिः।एवं धर्मो मानवं देवत्वं गमयति। समाजे वृक्षस्य पूजां द्रष्टुं शक्यते। तेषु वृक्षेषु तुलसी अन्यतमा।तुलसी भगवतः श्रीकृष्णस्य प्रियवृक्षः इति कविः कथयति यथा-

**साध्वी सा तुलसी जलन्धरवधूरासादिता मामहो**
**साहं कृष्णसुगीतया निगदितो ह्यश्वत्थरूपा हरेः।**
**धात्री सामलका सदा च जगतस्सेव्याऽहमाबालकम्**
**रम्भाहं प्रतिवासरं सुरगुरोः पूज्ये सदा भारतैः।।**

वानकी.विभूतिखण्डः.२१

❖ **विश्वशान्तिवार्ता यथा-**

काव्ये प्रामुख्येन प्राकृतिक चिन्तनं बहुधा कृतम्।वृक्षसंरक्षणे कथं जगतः अभ्युन्नतिः भविष्यति,वृक्षः कथम् अस्माकं जीवनं प्रभावयति तथा वृक्षसेवया कथं निखिलेऽस्मिन् जगति पुनः शान्तिप्रतिष्ठा भविष्यति तत्काव्ये वर्णितं यथा-

**सृष्टेरङ्गचतुष्टये मम पदं चोद्भिज्जशब्दाह्वयम्**
**वानप्रस्थचतुष्टयाश्रमपदे वानं तृतीयं च मे।**
**भूगोले मरूसारगरागवनके वानं चतुर्थ पदम्**
**वानं शुष्कफलं न हि कदा वानं वनानां चयः।।**

वानकी.विभूति.२०

मानवसमाजस्य परिरक्षणाय विश्वशान्तिप्रतिष्ठापनाय च प्रकृतेः महदवदानं काव्येऽस्मिन् यद् वर्णितं तेन सहृदयैरभ्युपगम्यते।

**कवेः पुरस्काराः-**

असाधारणः प्रतिभावान्,विलक्षणो विद्वान्,श्रद्धास्पदः,सदाचरणेन विद्वत्समाजे लब्धप्रतिष्ठः सम्पूर्णेऽस्मिन् भारतवर्षे च प्रगाढपाण्डित्येन प्रख्यातः आचार्य जि.एस्.आर्.कृष्णमूर्तिमहोदयः विविधसंस्थाद्वारा पुरस्कृतः। यथा-

१.साहित्यपुरस्कारः-उत्तरप्रदेश संस्कृत अकादमी पक्षतः।
२.विशिष्टसाहित्यपुरस्कारः-उत्तरप्रदेश संस्कृत संस्थानम्।
३.महामहोपाध्यायः-हिन्दी साहित्य सम्मेलनम्,प्रयागः।
४.श्रीचन्द्रशेखरसरस्वतीपुरस्कारः-काञ्चीपुरपक्षतः।
५.पौरसम्मानः आन्ध्रप्रदेशपलेश्वरब्राह्मणसेवासमीतिपक्षतः।
६.सुरभारती पुरस्कारः-संस्कृत नेटपक्षतः।

**उपसंहारः-**

महोदयस्य लेखन्यां ओजसः,बलस्य तथा च नवनवोन्मेषशालिन्याः प्रतिभायाश्च साधु योग आसीत्,यस्मात् स संस्कृतभाषायां रुचिरां रचनां विहितवान्। कविरूपेण सहृदयव्यक्तिरूपेण ग्रन्थनिर्मातृरूपेण, सम्पादकरूपेण, छात्रवत्सलाध्यापकरूपेण च आभारतं कवेरस्य प्रसिद्धिरस्ति।

आचार्य जि.एस्.आर्.कृष्णमूर्तिमहोदयानां स्थानम् आधुनिकसंस्कृत-साहित्यजगति उच्चतमं भवति। समयानुधर्मिकविषु अन्यतमः यशस्वी प्रतिभावान् युगोपयोगी कविः वर्तते। आचार्यस्य रचनाः आधुनिककाव्यधारायाः निःसृता काऽपि स्रोतस्विनीव प्रसरति सर्वजनहृदयभूमौ।अयमाचार्येः स्व पितरौ-गुरुस्तथा राष्ट्रस्यापि गौरवं वर्धितम्।

**सन्दर्भग्रन्थाः-**

१.वानकी- आचार्य जि.एस्.आर्.कृष्णमूर्तिः।
२.नवरूपकम्- आचार्य जि.एस्.आर्.कृष्णमूर्तिः।
३.ब्रह्मोत्सवतारावलीः- आचार्य जि.एस्.आर्.कृष्णमूर्तिः।
४.कालं न निद्रापयाणि- आचार्य जि.एस्.आर्.कृष्णमूर्तिः।
५.किमपि दुष्करं न हि- आचार्य जि.एस्.आर्.कृष्णमूर्तिः।
६.संस्कृतसाहित्येतिहासः-बलदेव उपाध्यायः।